# श्री काळी अपराधक्षमापण स्तोत्रं

## श्री काळी अपराधक्षमापण स्तोत्रं

प्राग्देहस्थोय दाहं तव चरण युगान्नाश्रितो नार्चितोऽहं
तेनाद्या कीर्तिवर्गेर्जठरजदहनैर्बाद्ध्यमानो बलिष्ठैः |
क्षिप्त्वा जन्मांतरान्नः पुनरिहभविता क्वाश्रयः क्वापि सेवा
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 1 ||

बाल्येवालाभिलायैर्जडित जडमतिर्बाललीला प्रसक्तो
न त्वां जानामि मातः कलिकलुषहरा भोगमोक्ष प्रदात्रीं |
नाचारो नैव पूजा न च यजन कथा न स्मृतिर्नैव सेवा
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 2 ||

प्राप्तोऽहं यौवनं चेद्विषधर सदृशैरिंद्रियैर्दृष्ट गात्रो
नष्ट प्रज्ञः परस्त्री परधन हरणे सर्वदा साभिलाषः |
त्वत्पादांभोजयुग्मं क्षणमपि मनसा न स्मृतोऽहं कदापि
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 3 ||

प्रौढो भिक्षाभिलाषी सुत दुहितृ कलत्रार्थमन्नादि चेष्ट
क्व प्राप्स्ये कुत्रयामी त्वनुदिनमनिशं चिंतयामग्न देहः |
नोतेध्यानंत चास्था न च भजन विधिन्नाम संकीर्तनं वा
क्षंतव्योमेऽपराधः प्रकटित वदने कामरूपे कराळे || 4 ||

वृद्धत्वे बुद्धिहीनः कृश विवशतनुः श्वासकासातिसारैः
कर्णनिहोऽक्षिहीनः प्रगळित दशनः क्षुत्पिपासाभिभूतः |
पश्चात्तापेनदग्धो मरणमनुदिनं ध्येय मात्रन्नचान्यत्
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 5 ||

कृत्वास्नानं दिनादौ क्वचिदपि सलिलं नोकृतं नैव पुष्पं
ते नैवेद्यादिकं च क्वचिदपि न कृतं नापिभावो न भक्तिः |
न न्यासो नैव पूजां न च गुण कथनं नापि चार्चाकृता ते
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 6 ||

जानामि त्वां न चाहं भवभयहरणीं सर्वसिद्धिप्रदात्रीं
नित्यानंदोदयाढ्यां त्रितय गुणमयी नित्यशुद्धोदयाढ्यां |
मिथ्याकर्माभिलाषैरनुदिनमभितः पीडितो दुःख संघैः
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 7 ||

कालाभ्रां श्यामालांगीं विगळित चिकुरा खड्गमुंडाभिरामां
त्रास त्राणेष्टदात्रीं कुणपगणशिरो मालिनीं दीर्घनेत्रां |
संसारस्यैकसारां भवजन न हरांभावितोभावनाभिः
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 8 ||

ब्रह्मा विष्णुस्तथेशः परिणमति सदा त्वत्पदांभोज युक्तं
भाग्याभावान्न चाहं भवजननि भवत्पादयुग्मं भजामि |
नित्यं लोभ प्रलोभैः कृतविशमतिः कामुकस्त्वां प्रयाषे
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 9 ||

रागद्वेषैः प्रमत्तः कलुषयुततनुः कामनाभोगलुब्धः
कार्याकार्या विचारी कुलमति रहितः कौलसंघैर्विहीनः |
क्व ध्यानं ते क्व चार्चा क्व मनुजपनन्नैव किंचित् कृतोऽहं
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 10 ||

रोगी दुःखी दरिद्रः परवशकृपणः पांशुलः पाप चेता
निद्रालस्य प्रसक्ताः सुजठरभरणे व्याकुलः कल्पितात्मा |
किं ते पूजा विधानं त्वयि क्वचनुमतिः क्वानुरागः क्वचास्था
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 11 ||

मिथ्या व्यामोह रागैः परिवृतमनसः क्लेशसंघान्वितस्य
क्षुन्निद्रौघान्वितस्य स्मरण विरहिणः पापकर्म प्रवृत्तेः |
दारिद्र्यस्य क्व धर्मः क्व च जननिरुचिः क्व स्थितिः साधुसंघैः
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 12 ||

मातस्तातस्यदेहाज्जननि जठरगः संस्थितस्त्वद्वशेहन्
त्वं हर्ता कारयित्री करण गुणमयी कर्महेतु स्वरूपा |
त्वं बुद्धिश्चित्त संस्थाप्यहमतिभवती सर्वमेतत् क्षमस्व
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 13 ||

त्वं भूमिस्त्वं जलं च त्वमसि हुतवहस्त्वं जगद्वायुरूपा
त्वं चाकाशं मनश्च प्रकृतिरसि महत्पूर्विका पूर्वपूर्वा |
आत्मा त्वं चाऽसि मातः परमसि भवती त्वत्परन्नैव किंचित्
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 14 ||

त्वं काळी त्वं च तारा त्वमसि गिरिसुता सुंदरी भैरवी त्वं
त्वं दुर्गा छिन्नमस्ता त्वमसि च भुवना त्वं हि लक्ष्मीः शिवा त्वं |
धूमा मातंगिनी त्वं त्वमसि च बगला मंगळादिस्तवाख्या
क्षंतव्यो मेऽपराधः प्रकटित वदने कामरूपे कराळे || 15 ||

स्तोत्रेणानेन देवीं परिणमति जनो यः सदाभक्तियुक्तो
दुष्कृत्यादुर्ग संघं परितरति शतं विघ्नतां नाशमेति |
नाधिर्व्याधि कदाचिद्भवति यदि पुनः सर्वदा साऽपराधः
सर्वं तत् कामरूपे त्रिभुवनजननि क्षामये पुत्र बुद्ध्या || 16 ||

ज्ञाता वक्ता कवीशो भवति धनपतिर्दानशीलो दयात्मा
निष्पापी निष्कलंकी कुलपति कुशलः सत्यवाग्धार्मिकश्च |
नित्यानंदो दयाढ्यः पशुगणविमुखः सत्पथा चारुशीलः
संसाराब्धिं सुकेन प्रतरति गिरिजा पादयुग्मावलंबात् || 17 ||

इति श्री काळी अपराधक्षमापण स्तोत्रं ||